# APPENDIX-6

## 6.1CLASSICAL AYURVEDIC REFERENCES

### आढकी (बीजम्)

आढकीनां च बीजानि पटोलामलकैः सह ।
भोजनार्थं प्रयोज्यानि पानं चानु मधूदकम्।।
अरिष्टांश्चानुपानार्थे मेदोमांसकफापहान् ।
अतिस्थौल्यविनाशाय संविभज्य प्रयोजयेत्।।
(च. सू. 21/26)

आढकी कफपित्तघ्नी वातला कफवातनुत्।।
(च. सू. 27/33)

आढकी कफपित्तघ्नी किञ्चिन्मारुतकोपनी।
कषाया स्वादुसंग्राही कटुपाका हिमा लघुः।।
मेदःश्लेष्मास्त्रपित्तेषु हिता लेपोपसेकयोः।
(ध. नि. सुवर्णादि वर्ग 83 पृ0 193)

तुवरी ग्राहिणी शीता लघुः कफविषास्त्रजित्।
(म.नि.धान्यवर्ग 51)

आढकी तुवरी चाथ कालवृन्ता कुलत्थका।
तुवरी तुवरा रूक्षा मधुरा शीतला लघुः ।।
ग्राहिणी वातला वर्ण्या कफपित्तविषापहा।
(कै. नि. धान्यवर्ग 74-75)

आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका ।
आढकी तुवरा रूक्षा मधुरा शीतला लघुः।।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्त्रजित्।
(भा.प्र.नि.धान्यवर्ग5/52)

# अगुरु (रालीय काष्ठ)

शैलेयमेलाऽगुरुणी सकुष्ठे चण्डा नतं त्वक्सुरदारु रास्ना।
शीतं निहन्यादचिरात्प्रदेहो विषं शिरीषस्तु ससिन्धुवारः।।28।।

(च.सू.3)

शटी पुष्करमूलाम्लवेतसैला हिङ्ग्वागुरुसुरसातामलकी।।
जीवन्तीचण्डा इति दशेमानि श्वासहराणि भवन्ति।।37।।

(च.सू.4)

तगरागुरुधान्यकश्रृङ्गवेरभूतीकवचाकण्टकार्यग्निमन्थ-
श्योनाकपिप्पल्य इति दशेमानि शीतप्रशमनानि भवन्ति।।42।।

(च.सू. 4)

अतोभूयःकर्मौषधानां च प्राधान्यतः सानुबन्धानि च
द्रव्याण्यनुव्याख्यास्यामः। तद्यथा ................रास्नाऽगुरुणी
शीतापनयनप्रलेपनानां।।40।।

(च.सू. 25)

अर्कागुरुगुडूचीनां तिक्तानामुष्णमुच्यते।।71।।

(च.सू. 26)

शिरोविरेचनद्रव्याणि पुनरपामार्ग............
.....देवदार्वगुरुसरलशल्लकी .........।
हिङ्गुनिर्यासाश्च ।।158।।

(च. वि. 8)

सुश्रुते सालसारादिगणे एलादिगणे श्लेष्मसंशमनवर्गे च
कुष्ठमेहपाण्डुवातकफविषकण्डूपिडकाकोठमेदरोगेषु
एवं वर्ण प्रसादनार्थं पठ्यते।। 8-9, 24-25, 9।।

(सु. सू.38,39)

कटुतिक्तोष्णमगुरु स्निग्धं वातकफापहम्।
श्रुतिनेत्ररुजं हन्ति माङ्गल्यं कुष्ठनुत्परम् ।।25।।

(ध. नि. चंदनादिवर्ग)

कृष्णागुरु कटुस्तिक्तस्तीक्ष्णोष्णः पित्तलो लघुः।।127।।
कर्णाक्षिरोगत्वग्दोष शीतवातकफप्रणुत्।

(कै. दे. नि. ओषधिवर्ग)

कृष्णागुरु कटूष्णञ्च तिक्तं लेपे च शीतलम्।
पाने पित्तहरं किञ्चित् त्रिदोषघ्नमुदाहृतम्।।87।।

(रा.नि. चन्दनादिवर्ग)

अगुरुष्णं कटु त्वच्यं तिक्तं तीक्ष्णञ्च पित्तलम्।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ।।22।।
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः ।।23।।

(भा. प्र. नि. कर्पूरादिवर्ग)

# अक्लारि (बीज मज्जा)

**समुद्रनारिकेलस्तु** मधुरः कटुको लघुः।
**वीर्योष्णः** कफवातघ्नः शीतप्रशमनो मतः।।
**हृद्यो** विषघ्नोऽनलकृत् तृष्णानिग्रहणः परम्।
**विषूचिकायां** हृद्रोगे ज्वरे शीते च शस्यते।

(प्रो.प्रियव्रतशर्मा कृत द्रव्य गुण विज्ञान)
पृ. क्र. 732

# अपराजिता (गिरिकर्णी पत्रम्)

गिरिकर्णीद्वयं तिक्तं पित्तोपद्रवनाशनम्।
चक्षुष्यं विषदोषघ्नं त्रिदोषशमनं च तत्॥78॥
(ध. नि., करवीरादिवर्ग)

गिरिकर्णी हिमा तिक्ता ग्रहघ्नी कण्ठदृष्टिदा।
त्रिदोषशूलकुष्ठामव्रणशोफविषापहा॥1080॥
(कै.नि.,)

गिरिकर्णी हिमा तिक्ता पित्तोपद्रवनाशिनी ।
चक्षुष्या विषदोषघ्नी त्रिदोषशमनी च सा ॥ 89॥
(रा. नि. गुडूच्यादिवर्ग)

आस्फोता गिरिकर्णीस्याद्विष्णुक्रान्ताऽपराजिता ।
अपराजिते कटू मेध्ये शीते कण्ठ्ये सुदृष्टिदे ॥
कुष्ठमूत्रत्रिदोषामशोथव्रणविषापहे ।
कषाये कटुके पाके तिक्ते च स्मृतिबुद्धिदे॥112॥
(भा. प्र. नि. गुडूच्यादिवर्ग)

# आत्मगुप्ता (मूलम्)

ऐन्द्री ऋषभी अतिरसा ....बला इति
दशेमानि बल्यानि भवन्ति ॥7॥
(च.सू.4)

विदारिगन्धा... ऋषभी चेति।
विदारिगन्धादिरयं गणः पित्तानिलापहः।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः॥4-5॥
(सु. सू. 38)

क्षीरपक्वांस्तु गोधूमानात्मगुप्ताफलैः सह।
शीतान्घृतयुतान् खादेत्तत्पश्चात्पिबेत्पयः॥30॥
(सु. चि. 26)

स्वयंगुप्तेक्षुरकयोः फलचूर्णं सशर्करम्।
धारोष्णेन नरः पीत्वा पयसा न क्षयं व्रजेत्॥33॥
(सु. चि. 26)

वातव्याधौ.... तथात्मगुप्तास्वरसं (बीजक्वाथं) पिबेत् वा।
.... मासाद् भवेद् वज्रसमान बाहुः ॥27॥
(चक्रदत्त 22)

कपिकच्छुः रसे स्वादु तिक्ता शीताऽनिलापहा।
वृष्या पित्तास्रहन्त्री च दुष्टव्रणविनाशिनी॥148॥
(ध. नि. गुडूच्यादिवर्ग)

कपिकच्छुः स्वादुतिक्ता वातपित्तकफास्त्रजित्।
शीतलं बृंहणं वृष्यं माषतुल्यं तयोः फलम् ।।608।।
कपिकच्छूफलं वृष्यं शीतं स्वादुरसं गुरु।
रक्तपित्तानिलहरं दुष्टव्रणविशोधनम् ।।609।।
(कै. नि. ओषधिवर्ग)

कपिकच्छुः स्वादुरसा वृष्या वातक्षयापहा।
शीतपित्तास्त्रहन्त्री च विकृताव्रणनाशिनी ।।53।।
(रा.नि.गुडूच्यादिवर्ग)

कपिकच्छुर्भृशं वृष्या मधुरा बृंहणी गुरुः।
तिक्ता वातहरी बल्या कफपित्तास्त्रनाशिनी ।।130।।
तद्बीजं वातशमनं स्मृतं वाजीकरं परम् ।।131।।
(भा.प्र.नि.गुडूच्यादिवर्ग)

कच्छुरा तुवरा तिक्ता योनिदोषापहा मता।
कुष्ठव्रणं रक्तकोपं नाशयेदिति कीर्तिता।।
(नि.र.)

# बिल्वः (शा.त्वक)

बिल्वं साड्.ग्राहिकदीपनीय वातकफप्रशमनानाम् ॥40॥
(च.सू.25)

वरुणआर्तगल....शतावरीबिल्व .... चेति ॥10॥
वरुणादिर्गणोह्येष कफमेदोनिवारणः ॥
विनिहन्ति शिरःशूलगुल्माभ्यन्तरविद्रधीन्॥11॥
(सु.सू.38)

बिल्वाग्निमन्थ .... काश्मरी चेति महत् ॥68॥
सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्॥
मधुरानुरसं चैव पञ्चमूलं महत् स्मृतम्॥69॥
(सु.सू.38)

बिल्वमूलं त्रिदोषघ्नं छर्दिघ्नं मधुरं लघु ॥106॥
(ध.नि. गुडूच्यादिवर्ग)

श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत्।
वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः ॥13॥

(भा. प्र. नि., गुडूच्यादिवर्ग)

बिल्वत्वचो गुडूच्या वा क्वाथः क्षौद्रेण संयुतः ।
छर्दि त्रिदोषजां हन्ति पर्पटः पित्तजां तथा ॥23॥
(भा.प्र.म.ख.17 छर्द्याधिकार)

# चम्पकः (पुष्पम्)

चम्पकं रक्तपित्तघ्नं शीतोष्णं कफनाशनम् ।।288।।
(सु.सू.46)

चम्पकः कथितः शीतो वीर्य्यऽतिकटुको रसे ।
हृद्यः सुगन्धिर्विषहा कफपित्तविनाशनः ।।132।।
(ध. नि. आम्रादिवर्ग)

चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः।
निहन्ति कफपित्तास्त्रमूत्रकृच्छ्रविषकृमीन्।।1500।।
(कै. नि. ओषधिवर्ग)

चंपकः कटुकस्तिक्तः शिशिरो दाहनाशनः ।
कुष्ठकण्डूव्रणहरो गुणाढ्यो राजचम्पकः ।।241।।
(रा. नि. करवीरादिवर्ग)

चंपकः कटुकस्तिक्तः कषायो मधुरो हिमः।
विषक्रिमिहरः कृच्छ्रकफवातास्त्रपित्तजित्।।32।।
(भा.प्र.नि. पुष्पवर्ग)

# चिञ्चा (फलकल्कम्)

अम्लिकायाः फलं पक्वं तस्माद् (ग्राहि रूक्षोष्णं
वातश्लेष्मणि शस्यते) अल्पान्तरं गुणैः ||151-152||
(च.सू.27)

अम्लिकायाः फलं पक्वं तद्वत्
(तिन्तिडीकवत्) भेदि तु केवलम्||160||
(सु.सू.46)

अम्लिकायाः फलं चाम्लमत्यन्तं पित्तकृल्लघुः।
रक्तकृत् वातशमनं बस्तिशुध्दिकरं परम् ||28||
पक्वं तु मधुराम्लं च भेदि विष्टम्भि वातजित्। ||29||
(ध.नि. आम्रादिवर्ग)

अम्लिकाऽम्ला गुरुर्वातहरा पित्तकफास्त्रजित् ।
पक्वा तद्वत्सरा रुच्या वह्निवस्तिविशुध्दिकृत्।
शुष्का हृद्या श्रमभ्रान्तितृष्णाक्लमहरा लघुः।।
(म. पा. नि.)

चिञ्चाम्लोष्णा गुरुर्वातहरी पित्तकफास्त्रदा।
तिन्तिडीकफलं बालमसृक्पित्तबलासकृत् ||365||
ग्राह्युष्णं दीपनं रुच्यं मध्यमं कफवातनुत्।
तद्वत्पक्वा सरा रूक्षा रुच्याग्निबस्तिशुध्दिकृत् ||366||
हृद्या कफघ्नी शुष्कैवं तृट्क्लमश्रमजिल्लघुः।
वातश्लेष्मकरं ज्ञेयं नवं तिन्तिडिकाफलम् ||367||

सम्वत्सरस्थितं तत्तु पित्तघ्नमनिलापहम्।
(कै.नि. ओषधिवर्ग)

चिञ्चात्यम्ला भवेदामा पक्वा तु मधुराम्लिका।
वातघ्नी पित्तदाहास्त्रकफदोषप्रकोपनी ।।163।।
अम्लिकायाः फलं त्वाममत्यम्लं लघु पित्तकृत्।
पक्वं तु मधुराम्लं स्याद्भेदि विष्टम्भवातजित्।।164।।
पक्वचिञ्चाफलरसो मधुराम्लो रुचिप्रदः ।
शोफपाककरो लेपाद्व्रणदोषविनाशनः ।।165।।
(रा.नि. आम्रादिवर्ग)

अम्लिकाऽम्ला गुरुर्वातहरी पित्तकफास्त्रकृत्।
पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत् ।।143।।
(भा. प्र. नि. आम्रादिफलवर्ग)

शुष्कं चिञ्चाफलं हृद्यं लघु भ्रान्तिश्रमापहम्।
तृषाहरं क्लमहरं कृमिनाशकरं मतम्।।
(नि. र.)

# चिञ्चा (फलकल्कम्)

अम्लिकायाः फलं पक्वं तस्माद् (ग्राहि रूक्षोष्णं
वातश्लेष्मणि शस्यते) अल्पान्तरं गुणैः ॥151-152॥
(च.सू.27)

अम्लिकायाः फलं पक्वं तद्वत्
(तिन्तिडीकवत्) भेदि तु केवलम्॥160॥
(सु.सू.46)

अम्लिकायाः फलं चाम्लमत्यन्तं पित्तकृल्लघुः।
रक्तकृत् वातशमनं बस्तिशुध्दिकरं परम् ॥28॥
पक्वं तु मधुराम्लं च भेदि विष्टम्भि वातजित्। ॥29॥
(ध.नि. आम्रादिवर्ग)

अम्लिकाऽम्ला गुरुर्वातहरा पित्तकफास्त्रजित् ।
पक्वा तद्वत्सरा रुच्या वह्निवस्तिविशुध्दिकृत्।
शुष्का हृद्या श्रमभ्रान्तितृष्णाक्लमहरा लघुः॥
(म. पा. नि.)

चिञ्चाम्लोष्णा गुरुर्वातहरी पित्तकफास्त्रदा।
तिन्तिडीकफलं बालमसृक्पित्तबलासकृत् ॥365॥
ग्राह्युष्णं दीपनं रुच्यं मध्यमं कफवातनुत्।
तद्वत्पक्वा सरा रूक्षा रुच्याग्निबस्तिशुध्दिकृत् ॥366॥
हृद्या कफघ्नी शुष्कैवं तृट्क्लमश्रमजिल्लघुः।
वातश्लेष्मकरं ज्ञेयं नवं तिन्तिडिकाफलम् ॥367॥

## दाडिम (फलः, फलत्वक्, पत्रम्)

दाडिममातुलुङ्गानि इति दशेमानि हृद्यानि भवन्ति।। 10।।

(च. सू. 4)

दाडिमयवषष्टिको ...... इति दशेमानि छर्दिनिग्रहणानि भवन्ति।। 28।।

(च. सू. 4)

दाडिमफल्गुपरुषकेक्षुयवषष्टिका इति दशेमानि श्रमहराणि भवन्ति ।।40।।

(च. सू. 4)

अम्लं कषायमधुरं वातघ्नं ग्राहि दीपनम्।। 149।।
स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च ।
रूक्षाम्लं दाडिमं यत्तु तत् पित्तानिलकोपनम् ।।150।।
मधुरं पित्तनुत् तेषां तध्दि दाडिममुत्तमम् ।।151।।

(च.सू. 27)

रक्तार्शसि-त्वग्दाडिमस्य तद्वत् .....।।185।।

(च.चि.14)

गव्यं घृतं सैन्धवदाडिममामलकमित्येव वर्गः सर्वप्राणिनां सामान्यतः पथ्यतमः ।।5।।

(सु.सू. 20)

परूषक... दाडिमराजादन.... त्रिफला चेति ।
परुषकादिरित्येष गणोऽनिलनाशनः।।
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः ।।44।।

(सु.सू. 38)

कषायानुरसं तेषां दाडिमं नातिपित्तलम्।
दीपनीयं रुचिकरं हृद्यं वर्चोविबन्धनम् ॥141॥
द्विविधं तत्तु विज्ञेयं मधुरं चाम्लमेव च।
त्रिदोषघ्नं तु मधुरमम्लं वातकफापहम् ॥142॥
अम्लं समधुरं तिक्तं कषायं कटुकं सरम्।
(सु.सू. 46)

दाडिममामलकं....फलवर्गे अम्लेषु च प्रशस्यते ॥334-336॥
(सु.सू. 46)

उद्रिक्तपित्ताञ्जयति त्रीन्दोषान्स्वादु दाडिमम्॥117॥
पित्ताविरोधि नात्युष्णमम्लं वातकफापहम्।
सर्वं हृद्यं लघु स्निग्धं ग्राहि रोचनदीपनम्॥118॥
(अ. हृ. सू. 6)

रक्तार्शसि - त्वचं वा दाडिमोद्भवाम्.... ॥103॥
(अ. हृ. चि. 8)

व्यङ्गे अजाक्षीरेण वार्द्रदाडिमत्वक् ॥24॥
(अ.सं.उ. 37)

स्निग्धोष्णं दाडिमं हृद्यं कफपित्ताविरोधि च।
द्विविधं तच्च विज्ञेयं मधुरं चाम्लमेव च ॥62॥
(ध.नि. शतपुष्पादिवर्ग)

मधुरं तु त्रिदोषघ्नं स्वाद्वम्लं वातपित्तनुत् ।
असृक्पित्तकरं चाम्लं संग्राहि सर्वमुच्यते ॥307॥
दाडिमं रोचनं हृद्यं दीपनं नातिपित्तलम् ।
मेध्यं कण्ठास्यरोगघ्नं तर्पणं कफवातजित् ॥308॥
वर्चोविबन्धनं स्निग्धं कषायानुरसं लघु।

द्विविधं तत्तु विज्ञेयं मधुराम्लविभेदतः ॥309॥
अम्लं तु द्विविधं ज्ञेयं रूक्षाम्लं स्निग्धचुक्रकम्॥
स्वादु त्रिदोषतृड्दाहज्वरहृद्रोगनाशनम् ।
पित्ताविरोधि नात्युष्णं स्निग्धाम्लं कफवातनुत् ॥311॥
(कै. नि. ओषधिवर्ग)

दाडिमं मधुरमम्लकषायं कासवातकफपित्तविनाशी ।
ग्राहि दीपनकरं च लघूष्णं शीतलं श्रमहरं रुचिदायि ॥75॥
दाडिमं द्विविधमीरितमार्यैरम्लमेकमपरं मधुरं च ।
तत्र वातकफहारि किलाम्लं तापहारि मधुरं लघु पथ्यम् ॥76॥
(रा.नि. आम्रादिवर्ग)

तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ॥101॥
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ॥102॥
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम्॥103॥
स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।
अम्लं तु पित्तजनकमामं वातकफापहम् ॥104॥
(भा.प्र.नि. आम्रादिफलवर्ग)

पूयमेहे-प्रातः पिबेद् दाडिमवल्कफाण्टकं
सौजाकवान् कर्करशर्करासखम् ॥811॥
(सिद्ध भे. म. 4)

# देवदारुः (काष्ठसारः)

पाठामहौषधसुरदारुमुस्त .... इति दशेमानि
स्तन्यशोधनानि भवन्ति ॥18॥

(च. सू. 4)

हिक्काश्वासयोः - दशमूलस्य वा क्वाथमथवा देवदारुणः ।
तृषितो मदिरां वापि हिक्काश्वासी पिबेन्नरः ॥105॥

(च. चि. 17)

सरलदेवदारु.... स्नेहास्तिक्तकटुकषाया ।
दुष्टव्रणशोधनाः कृमिकफकुष्ठानिलहराश्च ॥123॥

(सु. सू. 45)

ज्वरे.... देवदारुणी ।
कषायं विधिवत् कृत्वा पेयमेतज्ज्वरापहम्॥204॥

(सु. उ. 39)

देवदारु रसे तिक्तं स्निग्धोष्णं श्लेष्मवातजित्।
आमदोषविबन्धाध्मप्रमेहविनिवर्तकम् ॥77॥

(ध. नि. गुडूच्यादिवर्ग)

देवकाष्ठं लघु स्निग्धं तिक्तोष्णं कटुकं रसे।
विपाके हन्ति कासामश्वासहिध्माकफानिलान्॥1310॥
ज्वरमेहविबन्धाध्मकण्डूशोफास्त्रपीनसान्॥

(कै. नि. ओषधिवर्ग)

स्निग्धदारु स्मृतं तिक्तं स्निग्धोष्णं श्लेष्मवातजित्।
आमदोषविबन्धार्शः प्रमेहज्वरनाशनम् ।।29।।
(रा. नि. चन्दनादिवर्ग)

देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च।
विबन्धाध्मानशोथामतन्द्राहिक्काज्वरास्त्रजित्।।
प्रमेहपीनसश्लेष्मकासकण्डूसमीरनुत् ।।25।।
(भा. प्र. नि. कर्पूरादिवर्ग)

स्निग्धदारुः कटुः पाके स्निग्धोष्णस्तिक्तको लघु।
कफवातप्रमेहार्शोमलस्तम्भामदोषहा।।
ज्वराध्मानश्वासकासशोफकण्डूविनाशकः।
हिक्कां तन्द्रां रक्तदोषं पीनसं चैव नाशयेत् ।।
(नि. र.)

# धत्तूरः (सं.व.)

धत्तूरः कटुरुष्णश्च कान्तिकारी व्रणार्तिनुत्।
कुष्ठानि हन्ति लेपेन प्रभावेण ज्वरं जयेत्।।7।।
त्वग्दोषकृच्छ्रकण्डूतिज्वरहारी भ्रमावहः।

(ध. नि. करवीरादिवर्ग)

धत्तूरो मधुरस्तिक्तस्तीक्ष्णोष्णस्तुवरो गुरुः।
उन्मादवांतिमंदाग्निकांतिदो ज्वरकुष्ठनुत्।।1547।।
यूकालिक्षाव्रणश्लेष्मकृमिकण्डूविषापहा।।

(कै. नि. ओषधि वर्ग)

धत्तूरः कटुरुष्णश्च कान्तिकारी व्रणार्तिनुत्।
त्वग्दोषखर्जूकण्डूतिज्वरहारी भ्रमप्रदः ।।19।।

(रा. नि. करवीरादिवर्ग)

धत्तूरो मदवर्णाग्निवातकृज्वरकुष्ठनुत्।।86।।
कषायो मधुरस्तिक्तो यूकालिक्षाविनाशकः।
उष्णो गुरुर्व्रणश्लेष्मकण्डूकृमिविषापहः।।87।।

(भा. प्र. गुडूच्यादिवर्ग)

# दूर्वा (पञ्चाङ्गम्)

चन्दन....सितालता इति दशेमानि वर्ण्यानि भवन्ति।।8।।
(च. सू. 4 )

ऐन्द्रीब्राह्मीशतवीर्या.... सहस्रवीर्या......
प्रजास्थापनानि भवन्ति ।।49।।
(च. सू. 4)

दूर्वा च नलमूलं .... शीतलाश्च गणाः
सर्वे प्रलेपः पित्तशोफहृत् ।।4।।
(सु.सू. 37)

चन्दन .... दूर्वा .... प्रभृतीनि .... पित्तसंशमनो वर्गः ।।8।।
(सु. सू. 39)

दूर्वा शीता कषाया च रक्तपित्तकफापहा ।। 129।।
(ध. नि. करवीरादिवर्ग)

नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत्।
(दूर्वा स्वाद्वी हिमा तिक्ता कषाया जीवनी जयेत् ।)
कफपित्तास्रविसर्पतृष्णादाहत्वगामयान् ।। 1231।।
(कै. नि., ओषधिवर्ग)

दूर्वाः कषाया मधुराश्च शीताः
पित्ततृषाऽरोचकवान्तिहन्त्र्यः ।
सदाहमूर्च्छाग्रहभूतशान्ति-
श्लेष्मश्रमध्वंसनतृप्तिदाश्च॥117॥
नीलदूर्वा तु मधुरा तिक्ता शिशिररोचनी ।
रक्तपित्तातिसारघ्नी कफवातज्वरापहा ॥ 108॥

(रा. नि. शाल्मल्यादिवर्ग)

नीलदूर्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्त्रवीसर्पतृष्णादाहत्वगामयान् ॥173॥
श्वेता दूर्वा कषाया स्यात्स्वाद्वी व्रण्या च जीवनी।
तिक्ता हिमा विसर्पास्त्रतृट्पित्तकफदाहहृत् ॥175॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

नीलदूर्वा तु मधुरा तिक्ता शीता रुचिप्रदा ।
सञ्जीवनी च तुवरा रक्तशुध्दिकरी मता ॥
रक्तपित्तातिसारघ्नी ज्वरपित्तवमीहरा।
कफं रक्तरुजं तृष्णां विसर्पं च विनाशयेत्॥
दाहं च चर्मदोषं च नाशयेदिति कीर्तिता।

(नि. र.)

# गम्भारी (काण्डत्वक)

काश्मर्य .... विरेचनोपगानि भवन्ति ॥24॥
(च. सू. 4)

काश्मर्य .... इति दशेमानि श्वयथुहराणि भवन्ति ॥38॥
(च. सू. 4)

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम्॥
सिता काश्मर्यमधुकैर्हितमुत्थापने पयः ॥95॥
(च. चि. 28)

सिध्दं (तैलं) मधुककाश्मर्यरसैर्वा वातरक्तनुत् ॥121॥
(च. चि. 29)

श्रीपर्णी स्वरसे तिक्ता गुरूष्णा रक्तपित्तजित् ॥
त्रिदोषश्रमदाहार्त्तिज्वरतृष्णाविषाञ्जयेत्॥115॥
(ध. नि. गुडूच्यादिवर्ग)

श्रीपर्णी मारुतश्लेष्मशोफमेहकृमीञ्जयेत् ॥153॥
(सो. नि. गुडूच्यादिवर्ग)

केश्या त्रिदोषशमनी कषायमधुरा रसे।
रसायनी भेदनी च मेध्या श्रीपर्णिका मता ॥
(म. नि.)

श्रीपर्णी मधुरा तिक्ता वीर्योष्णा तुवरा गुरु ।
दीपनी पाचनी मेध्या भेदनी भ्रमशोषजित् ॥ 30॥
दोषतृष्णामशूलार्शोविषदाहज्वरापहा।
(कै. नि. ओषधिवर्ग)

## गम्भारी (काण्डत्वक)

काश्मर्य .... विरेचनोपगानि भवन्ति ।।24।।
(च. सू. 4 )

काश्मर्य .... इति दशेमानि श्वयथुहराणि भवन्ति ।।38।।
(च. सू. 4 )

गर्भे शुष्के तु वातेन बालानाञ्चापि शुष्यताम्।।
सिता काश्मर्यमधुकैर्हितमुत्थापने पयः ।।95।।
(च. चि. 28)

सिध्दं (तैलं) मधुककाश्मर्यरसैर्वा वातरक्तनुत् ।।121।।
(च. चि. 29)

श्रीपर्णी स्वरसे तिक्ता गुरूष्णा रक्तपित्तजित् ।।
त्रिदोषश्रमदाहार्त्तिज्वरतृष्णाविषाञ्जयेत्।।115।।
(ध. नि. गुडूच्यादिवर्ग)

श्रीपर्णी मारुतश्लेष्मशोफमेहकृमीञ्जयेत् ।।153।।
(सो. नि. गुडूच्यादिवर्ग)

केश्या त्रिदोषशमनी कषायमधुरा रसे।
रसायनी भेदनी च मेध्या श्रीपर्णिका मता ।।
(म. नि.)

श्रीपर्णी मधुरा तिक्ता वीर्योष्णा तुवरा गुरु ।
दीपनी पाचनी मेध्या भेदनी भ्रमशोषजित् ।। 30।।
दोषतृष्णामशूलार्शोविषदाहज्वरापहा।
(कै. नि. ओषधिवर्ग)

काश्मरी कटुका तिक्ता गुरूष्णा कफशोफनुत् ।
त्रिदोषविषदाहार्त्तिज्वरतृष्णास्रदोषजित् ॥ 38॥

(रा. नि. प्रभद्रादिवर्ग)

काश्मरी तुवरातिक्ता वीर्योष्णा मधुरा गुरुः ॥ 15॥
दीपनी पाचनी मेध्या भेदनी भ्रमशोफजित्।
दोषतृष्णामशूलार्शोविषदाहज्वरापहा ॥16॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

काश्मरी कटुका तिक्ता स्वादूष्णा तुवरा गुरुः।
मधुरा दीपनी मेध्या पाचनी भेदिका मता ॥
हृद्या तृषामशूलघ्नी कफशोफत्रिदोषहा।
विषदाहज्वररक्तदोषार्शोभ्रमनाशिनी॥

(नि. र.)

## इक्षुः (मूलस्तम्भः)

सारिवेक्षुमूलमधुक .... कण्टकारिका
इति दशेमानि कण्ठ्यानि भवन्ति ॥9॥
(च. सू.4)

इक्षवो मधुरा मधुरविपाका गुरवः शीताः स्निग्धा बल्या वृष्या
मूत्रला रक्तपित्तप्रशमनाः कृमिकफकराश्चेति ॥148॥
(सु. सू.45)

इक्षुः सरो गुरुः स्निग्धो बृंहणः कफमूत्रकृत् ।
वृष्यः शीतः पवनजिद्भुक्ते वातप्रकोपनः ॥110॥
अतीव मधुरो मूले मध्ये मधुर एव च ।
अग्रे त्वचि च विज्ञेय इक्षूणां लवणो रसः ॥112॥
इक्षुयुग्मं रसे स्वादु पित्तघ्नं वृष्यशीतलम्।
(ध. नि. करवीरादिवर्ग)

इक्षुः शीतो गुरुः स्निग्धो मधुरो रसपाकयोः।
जीवनो बृंहणः वृष्यः कृमिमूत्रकफप्रदः ॥139॥
सरः संतर्पणो बल्यो ह्लादी पित्तास्त्रनाशनः।
ओजस्यो वातजित् भुक्तमात्रे वातप्रकोपणः ॥140॥
(कै. नि. ओषधिवर्ग)

मूलादूर्ध्वन्तु मधुरा मध्येऽतिमधुरास्तथा ।
इक्षवस्तेऽग्रभागेषु क्रमाल्लवणनीरसाः ॥94॥
(रा. नि. पानीयादिवर्ग)

इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः॥2॥
(भा. प्र. नि. इक्षुवर्ग)

# कदली (पुष्पम्)

संपक्वं पनसं मोचं राजादनफलानि च ।
स्वादूनि सकषायाणि स्निग्धशीतगुरूणि च ॥140॥
(च. सू. 27)

लोध्र .... कदलीचेति ॥14॥
एष रोध्रादिरित्युक्तो मेदःकफहरो गणः ।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः ॥15॥
(सु.सू.38)

तालनारिकेलपनसमोचप्रभृतीनि ॥77॥
स्वादुपाकरसान्याहुर्वातपित्तहराणि च ॥
बलप्रदानि स्निग्धानि बृंहणानि हिमानि च ॥ 178॥
(सु.सू. 46)

मौचं (फलं)स्वादुरसं प्रोक्तं कषायं नातिशीतलम् ॥
रक्तपित्तहरं वृष्यं रुच्यं श्लेष्मकरं गुरु ॥181॥
(सु.सू.46)

कदली मधुरा शीता रम्या पित्तहरा मृदुः ।
कदल्यास्तु फलं स्वादु कषायं नातिशीतलम्
रक्तपित्तहरं वृष्यं रुच्यं कफकरं गुरु ॥76॥
(ध.नि. करवीरादिवर्ग)

कदली कुसुमं तिक्तं कषायं ग्राहि दीपनम् ।
उष्णवीर्यं बलासघ्नं तादृशाः तत् सटादयः ॥286॥
(कै.नि. ओषधिवर्ग)

बालं फलं मधुरमल्पतया कषायं पित्तापहं
शिशिररुच्यमथापिनालम् ।
पुष्पं तदप्यनुगुणं क्रिमिहारि कन्दं पर्णञ्च शूलशमकं
कदलीभवं स्यात् ॥108॥

(रा. नि. आम्रादिवर्ग)

मोचाफलं स्वादु शीतं विष्टम्भि कफकृद् गुरु ।
स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ॥
पक्वं स्वादु हिमं पाके स्वादु वृष्यञ्च बृंहणम्।
क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृत् ॥34॥

(भा. प्र. नि. आम्रादिफलवर्ग)

# कर्चूरः (काण्डकन्दः)

रोचनो दीपनो हृद्यः सुगन्धिः त्वग्विवर्जितः ।
कर्चूरः कफवातघ्नः श्वासहिक्कार्शसां हितः ।।155।।
(च. सू. 27)

वातसंशमनो वर्गे काञ्चनक स्थाने कर्चूरः
पाठभेदो डल्हणेन पठितः ।।7।।
(सु. सू.39)

कर्चूरः कटुतिक्तोष्णो रुच्यो वातबलासजित् ।
दीपनः प्लीहगुल्मार्शः शमनः कुष्ठकासहा ।।94।।
(ध.नि. चन्दनादिवर्ग)

कर्चूरो मरुदामघ्नो दीपनो रक्तपित्तकृत्।
अजीर्णजरणः श्वासे चापस्मारेऽपि पूजितः ।। 356।।
(सो. नि.II)

कर्चूरो दीपनो रुच्यः कुष्ठार्शोव्रणकासनुत् ।
उष्णो लघुर्जयेत् श्वासगुल्मवातकफकृमीन्।।
(म.पा.नि.)

कर्चूरः कटुकस्तिक्तस्तीक्ष्णोष्णो दीपनो लघुः ।।1389।।
रोचनः कटुपाकोऽस्त्रपित्तकृत् कफवातजित् ।
श्वासकासकृमिप्लीहकुष्ठार्शोव्रणगुल्मनुत् ।। 1390।।
(कै.नि. ओषधिवर्ग)

कर्चूरः कटुतिक्तोष्णः कफकासविनाशनः ।
मुखवैशद्यजननो गलगण्डादिदोषनुत् ॥ 118॥
(रा.नि. पिप्पल्यादिवर्ग)

कर्चूरो दीपनो रुच्यः कटुकस्तिक्त एव च ॥95॥
सुगन्धिः कटुपाकः स्यात्कुष्ठार्शोव्रणकासनुत् ॥
उष्णो लघुर्हरेच्छ्वासगुल्मवातकफकृमीन् ॥96॥
(भा.प्र. नि. कर्पूरादिवर्ग)

कतकः कटुकस्तिक्तो लेखनो रुचिकृल्लघु ।
चक्षुष्यः तुवरः शीतो विशदश्च विकासकः
छेदनो मधुरश्चैव तृषादाहविषापहः ।
गुल्मशूलकृमीन्मेहं नेत्ररुग्जलजं मलम् ।।
नाशयेदिति च प्रोक्तं फलं तस्य च कोमलम्।
कतकस्य च बीजं तु चक्षुष्यं तुवरं गुरु ।
जलप्रसादनं शीतं मधुरं चाश्मरीहरम्।
वातं कफं मूत्रकृच्छ्रं तृषां नेत्ररुजं विषम्।
प्रमेहशीर्षरोगं च नाशयेदिति कीर्त्तितम्।

(नि. र.)

कतकः कटुकस्तिक्तो लेखनो रुचिकृल्लघु ।
चक्षुष्यः तुवरः शीतो विशदश्च विकासकः
छेदनो मधुरश्चैव तृषादाहविषापहः ।
गुल्मशूलकृमीन्मेहं नेत्ररुग्जलजं मलम् ।।
नाशयेदिति च प्रोक्तं फलं तस्य च कोमलम्।
कतकस्य च बीजं तु चक्षुष्यं तुवरं गुरु ।
जलप्रसादनं शीतं मधुरं चाश्मरीहरम्।
वातं कफं मूत्रकृच्छ्रं तृषां नेत्ररुजं विषम्।
प्रमेहशीर्षरोगं च नाशयेदिति कीर्त्तितम्।

(नि. र.)

# खर्जूरम् (फलम्)

द्राक्षाखर्जूर .... इति दशेमानि श्रमहराणि भवन्ति ॥ 40 ॥
(च. सू. 4)

मधुरं बृंहणं वृष्यं खर्जूरं गुरु शीतलम् ।
क्षयेऽभिघाते दाहे च वातपित्ते च तद्धितम्॥127॥
(च. सू.27)

क्षतक्षयापहं हृद्यं शीतलं तर्पणं गुरु ।
रसे पाके च मधुरं खर्जूरं रक्तपित्तजित्॥185॥
(सु. सू. 46)
(ध. नि. आम्रादिफलवर्ग)

....खर्जूर ................परुषकम्।
.....................................॥119॥
.....................च बृहणं गुरु शीतलम्॥120॥
दाहक्षतक्षयहरं रक्तपित्तप्रसादनम्।
स्वादुपाकरसं स्निग्धं विष्टम्भिकफशुक्रकृत्॥121॥
(अ. हृ. सू. 6)

खर्जूरिका फलं शीतं स्वादु स्निग्धं क्षतास्रजित्।
बल्यं हन्ति मरुत्पित्तमदमूर्च्छामदात्ययान् ॥19॥

(म. नि. फलादिवर्ग 6)

खर्जूरं तुवरं शीतं मधुरं रसपाकयोः ॥ 294॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥295॥
कोष्ठमारुतहृद् बल्यं दाहवातकफापहम्।
ज्वराभिघातक्षुत्तृष्णाकासश्वासान्नियच्छति ॥296॥
(कै. नि. ओषधिवर्ग)

खर्जूरी तु कषाया च पक्वा गौल्या कषायका।
पित्तघ्नी कफदा चैव कृमिकृत वृष्या च बृंहणी ॥ 56 ॥
(रा. नि. आम्रादिवर्ग)

खर्जूरी त्रितयं शीतं मधुरं रसपाकयोः ॥ 117॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥118॥
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम्।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ॥119॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ॥120॥
(भा. प्र. आम्रादिफलवर्ग)

# कृष्णसारिवा (मूलम्)

विदारिगन्धा .... सारिवा कृष्णसारिवा ....ऋषभी चेति।।4।।
विदारिगन्धादिरयं गणः पित्तानिलापहः ।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ।।5।।
(सु. सू. 38)

सारिवे द्वे तु मधुरे कफवातास्त्रनाशने ।
कुष्ठकण्डूज्वरहरे मेहदुर्गन्धिनाशने ।।160।।
कृष्णमूली तु संग्राही शिशिरा कफवातजित्।
तृष्णारुचिप्रशमनी रक्तपित्तहरा स्मृता ।।161।।
(ध. नि. गुडूच्यादिवर्ग)

सारिवा मधुरा तिक्ता सुस्निग्धा शुक्रला हिमा ।
गुर्वी ज्वरातिसारामदोषत्रयविषापहा ।।995।।
अग्निसादारुचिश्वासकासास्त्रप्रदरान् जयेत् ।।
(कै. नि. ओषधिवर्ग)

सारिवे द्वे तु मधुरे कफवातास्त्रनाशने।
कुष्ठकण्डूज्वरहरे मेहदुर्गन्धिनाशने ।।160।।
(रा. नि. चन्दनादिवर्ग)

सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु ।
अग्निसादारुचिश्वासकासामविषनाशनम् ।
दोषत्रयास्त्रप्रदरज्वरातीसारनाशनम् ।।238।।
(भा. प्र. नि. गुडूच्यादिवर्ग)

श्वेता तु सारिवा शीता मधुरा शुक्रला गुरु ।
स्निग्धा तिक्ता सुगन्धिश्च कुष्ठकण्डूज्वरापहा।।
देहदौर्गन्ध्याग्निमांद्यश्वासकासारुचीहरा।
आमत्रिदोषविषहृद्रक्तरुक्प्रदरापहा।।
कासातिसारतृड्दाहरक्तपित्तहरा परा।
वातनाशकरी प्रोक्ता ऋषिभिस्तत्वदर्शिभि : ।।
कृष्णा तु सारिवा शीता वृष्या च मधुरा मता ।
कफघ्नी चैव सम्प्रोक्ता गुणाश्चान्ये तु पूर्ववत्।।

(नि. र.)

# कुन्दुरुः (-कः) (निर्यासः)

एला .... कुन्दुरुकागुरु .... पुन्नागकेशरम् चेति ॥24॥
एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ॥25॥

(सु. सू. 38)

कुन्दुरुः कटुकस्तिक्तो वातश्लेष्मामयापहः।
पाने लेपे च शिशिरः प्रदरामयशांतिकृत् ॥ 132 ॥

(ध. नि. चन्दनादिवर्ग)

शर्करासहितो मेहं वृषणस्य व्यथां हरेत्

(शोढल)

कुन्दुरुः मधुरस्तिक्तः कफपित्तार्तिदाहनुत् ॥191॥

(रा. नि. चन्दनादिवर्ग)

कुन्दुरुः मधुरस्तिक्तः तीक्ष्णस्त्वच्यः कटुर्हरेत्।
ज्वरस्वेदग्रहालक्ष्मी मुखरोगकफानिलान् ॥ 51 ॥

(भा. प्र. नि. कर्पूरादिवर्ग)

कुन्दुरुः मधुरः तीक्ष्णः तिक्तो रुच्यः कटुस्मृतः ।
स्निग्धश्चोष्णस्तथा त्वच्यो ज्वरस्वेदकफापहः ॥
रक्तरुक्प्रदरं वातमलक्ष्मी ग्रहपीडनम् ।
रक्तातिसारं यूकां च नाशयेदिति कीर्तितः॥

(नि. र.)

# कुंकुमम् (जायाङ्गम्)

मधुमधुकरुधिर ....लाजा इति
दशेमानि शोणितास्थापनानि ॥46॥
(च. सू. 4)

एलातगर ... कुंकुमानि पुन्नागकेशरं चेति ॥24॥
एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादनः कण्डूपिडकाकोठनाशनः ॥25॥
(सु. सू. 38)

श्लेष्मापित्तविषघ्नं तु नागं तद्वच्च कुंकुमम् ॥ 287॥
(सु. सू. 46)

कुंकुमं कटुकं तिक्तं उष्णं श्लेष्मसमीरजित्।
व्रणदृष्टिशिरोरोगविषहृत् कायकान्तिकृत् ॥ 12 ॥
(ध. नि. चन्दनादिवर्ग)

स्निग्धोष्णं वातशमनं वर्णकृद्देहगन्धहृत् ।
कुंकुमं रसतस्तिक्तं कषायं कृमिनाशनम् ॥
(म. नि.)

कुंकुमं कटुकं तिक्तं वर्ण्यं व्रणविशोधनम्।
हन्ति दोषत्रयं हिक्काशिरोरोगवमिकृमीन्॥ 1302॥
(कै. नि. ओषधिवर्ग)

कुंकुमं सुरभि तिक्तकटूष्णं कासवातकफकण्ठरुजाघ्नम्।
मूर्धशूलविषदोषनाशनं रोचनं च तनुकान्तिकारम् ॥41॥

(रा. नि. चन्दनादिवर्ग)

कुंकुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित्।
तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥78॥

(भा. प्र. नि. कर्पूरादिवर्ग)

## कूष्माण्डम् (फलम्)

सक्षारं पक्वकूष्माण्डं मधुराम्लं तथा लघु ।
सृष्टमूत्रपुरीषं च सर्वदोषनिबर्हणम् ।। 113 ।।
(च. सू. 27)

पित्तघ्नं तेषु कूष्माण्डं बालं, मध्यं कफावहम्।
शुक्लं लघूष्णं सक्षारं दीपनं बस्तिशोधनम् ।। 213।।
(सु. सू. 46)

वल्लीफलानां प्रवरं कूष्माण्डं वातपित्तजित्।
बस्तिशुद्धिकरं वृष्यं हृद्यं चेतोविकारजित् ।। 181 ।।
(ध. नि. गुडूच्यादिवर्ग)

कूष्माण्डं भेद्यभिष्यन्दि विष्टम्भि वातपित्तजित् ।।185।।
बस्तिशुद्धिकरं वृष्यं स्वादुपाकरसं गुरु ।
विशेषात् पित्तनुत् बालं, मध्यं चैव कफापहम् ।।186।।
पक्वं लघूष्णं सक्षारं दीपनं पाचनं तथा ।
सर्वदोषहरं हृद्यं पथ्यं चेतोविकारनुत् ।।187।।
(सो. नि. II )

कूष्माण्डं शीतलं वृष्यं स्वादुपाकरसं गुरु।
हृद्यं रूक्षं रसस्यन्दि श्लेष्मलं वातपित्तजित् ।।527।।
(कै. नि. ओषधिवर्ग)

मूत्राघातहरं प्रमेहशमनं कृच्छ्राश्मरीछेदनम्।
विण्मूत्रग्लपनं तृषार्तिशमनं जीर्णाङ्गपुष्टिप्रदम्।
वृष्यं स्वादुतरं त्वरोचकहरं बल्यंच पित्तापहम् ।
कूष्माण्डं प्रवरं वदन्ति भिषजो वल्लीफलानां पुनः ।।161।।

(रा. नि. मूलकादिवर्ग)

कूष्माण्डं बृंहणं वृष्यं गुरु पित्तास्त्रवातनुत्।।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ।।54।।
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ।
बस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोषजित् ।।55।।

(भा. प्र. नि. शाकवर्ग)

कूष्माण्डकफलं वृष्यं पुष्टिकृद्धातुवर्द्धकम्।
बस्तिशुद्धिकरं बल्यमतिस्वादु च शीतलम्।।
गुरु रूक्षं सारकं च हृद्यं कफकरं मतम् ।
मूत्राघातं प्रमेहं च मूत्रकृच्छ्राश्मरीं तृषाम्।
अरोचकं वातपित्तं पित्तं रक्तरुजं तथा।
वातोरेतोविकारं च नाशयेदिति तन्मतम्।।
तत्कोमलं चातिशीतं दोषकृत्पित्तहारकम्।।
दीपकं च लघु स्वादु क्षारं बस्तेश्च शुद्धिदम्।
सर्वदोषहरं पथ्यं पक्वमज्जा च माधुरी।
बस्तिशुद्धिकरी वृष्या पित्तनाशकरी मता ।

(नि. र.)

# मदयन्ती (पत्रम्)

पत्रं च दद्यान्मदयन्तिकाया लेपोऽङ्गरागो नरदेवयोग्यः ।।43।।
|सु.चि.25|

शोणितमेहे मदयन्तीपत्रकल्कञ्च सक्षौद्रं शीताम्वुना ।।7।।
|अ.स.चि. 14|

समूलपुष्पच्छदपल्लवायाः रसः प्रयोज्यो मदयन्तिकायाः ।
मासोपयोगेन समस्तलिङ्गं यक्ष्माणमुग्रं हरति प्रसह्य।।
(वंगसेन राजयक्ष्मा. 45)

मदयन्तिकामूलस्य कषायः पूतशीतलः ।
शर्करामधुसंयुक्तो रक्तपित्तप्रणाशनः ।।
(गदनिग्रह 2/8/64)

रक्तरंगा दाहहन्त्री वान्तिकृत् श्लेष्मकुष्ठहा।
(नि. रत्नाकर)

मदयन्ती लघु रूक्षा कषाया तिक्तशीतला ।
कफपित्तप्रशमनी कुष्ठघ्नी सा प्रकीर्तिता ।।
निहन्ति ज्वरकण्डूतिदाहासृक्पित्तकामलाः ।
रक्तातीसारहृद्रोगमूत्रकृछ्रभ्रमव्रणान् ।।182।।
(द्र.गु.वि. 2, प्रो.प्रि.व्र. शर्मा)

## महानिम्बः (काण्डत्वक्)

महानिम्बो रसे तिक्तः शीतः पित्तकफापहः ।
कुष्ठरक्तविनाशी च विसूचीं हन्ति शीलितः ॥ 32 ॥
(ध. नि. गुडूच्यादिवर्ग)

महानिम्बः परं ग्राही कषायो रूक्षशीतलः ॥ 127॥
(सो. नि.II)

महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तकृमिच्छर्दिकुष्ठहृल्लासरक्तजित्।
(म. पा. नि)

महानिम्बो हिमो रूक्षो ग्राही तिक्तः कषायकः ।
निहन्ति कफपित्तास्रकुष्ठकोठवमिकृमीन् ॥888॥
(कै. नि. ओषधिवर्ग)

महानिम्बस्तु शिशिरः कषायः कटुतिक्तकः।
अस्रदाहबलासघ्नो विषमज्वरनाशनः ॥12॥
(रा. नि. प्रभद्रादिवर्ग)

महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः॥98॥
कफपित्त भ्रमछर्दिकुष्ठहृल्लासरक्तजित्।
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥99॥
(भा. प्र.नि. गुडूच्यादिवर्ग)

महानिम्बो कटुस्तिक्तः शीतश्च तुवरो मतः।
रूक्षो ग्राही कफं दाहं व्रणं रक्तरुजं तथा ॥
पितं कृमीश्च विषमज्वरं च हृदयव्यथाम्।
सर्वकुष्ठानि छर्दीं च प्रमेहं च विषूचिकाम् ॥
मूषिकाया विषं गुल्मं शीतपित्तं च नाशयेत् ।
कोठरोगं चार्शरोगं श्वासं च विनिवारयेत्॥
(नि. र.)

# मण्डूकपर्णी (सं.व.)

अमृताभया .... मण्डूकपर्णी .... इति
दशेमानि वयःस्थापनानि भवन्ति ॥50॥
(च. सू. 4)

मण्डूकपर्णी वेत्राग्रं .... शाकं पार्पटकं च यत् ।
कफपित्तहरं तिक्तं शीतं कटु विपच्यते ॥93-95॥
(च. सू. 27)

चन्दननलद....वृषमण्डूकपर्णी ....इति तिक्तस्कन्धः॥150॥
(च. वि. 8)

मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
.... आयुः प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्धनानि मेध्यानि चैतानि रसायनानि ॥30॥
(च. चि. 1-3)

आहारार्थवर्गे-मण्डूकपर्ण्यः .... सामान्यतः पथ्यतमः ॥5॥
(सु. सू. 20)

आरग्वधादि .... मण्डूकपर्णी .... तिक्तो वर्गः ॥11॥
(सु. सू. 42)

**मण्डूकपर्णीसप्तला .... अर्कपुष्पीप्रभृतीनि .... ॥ 262॥**
**रक्तपित्तहराण्याहुर्हृद्यानि सुलघूनि च॥**
**कुष्ठमेहज्वरश्वासारुचिहराणि च ॥ 263॥**
**कषाया तु हिता पित्ते स्वादुपाकरसा हिमा।**
**लघ्वी मण्डूकपर्णी तु ...............॥264॥**
**(सु. सू. 46)**

पटोल .... मण्डूकपर्णी .... कर्कशम् ।
तिक्तं पाके कटु ग्राहि वातलं कफपित्तजित् ॥75-78॥

(अ. हृ. सू. 6)

मंडूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते ॥1172॥

(शो. नि. मिश्रकवर्ग)

सरस्वती ....ब्राह्मी ब्रह्मसुवर्चला ।
मण्डूकपर्णी मण्डूकी ब्राह्मणी .... सोमवल्यपि ॥721॥
ब्राह्मी शीता सरा तिक्ता कषाया मधुरा लघुः।
मेध्या स्वर्या स्वादुपाका हृद्यायुष्या रसायनी॥722॥
मतिस्मृतिप्रदा हन्ति कुष्ठकण्डूज्वरं मलान्।
शोफारुचिविषश्वासकासमेहास्त्र पाण्डुताः ॥723॥

(कै. नि. ओषधिवर्ग)

ब्राह्मी हिमासरा तिक्ता लघुर्मेध्या च शीतला।
कषाया मधुरा स्वादुपाकाऽऽयुष्या रसायनी॥
स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्त्रकासजित्॥
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिनी ॥281॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

## मयक्कु (मायुकम्), (कीटगृहम्)

मायुकं शीतलं रूक्षं कषायं लघु दीपनम् ।
विपाके कटुकं ग्राही कफपित्तहरं परम् ।।564-565।।
(सो. नि. 2)

मायाफलं वातहरं कटूष्णकं
शैथिल्यसंकोचकेशकाष्ण्र्यदम् ।।259।।
(रा. नि., पिप्पल्यादिवर्ग)

कीटावासो मज्जफलं ग्राहि बल्यं ज्वरापहम्।
शोणितस्रुतिहृद् हन्ति मुखदन्तगतान् गदान् ।।
श्वेतप्रदरमर्शांसि योनिकन्दं सुदारुणम् ।
अतिसारं महाघोरं ग्रहणीं सप्रवाहिकाम् ।।
(आ. वि.)

कषायः शीतलः प्रोक्तः कैशिकाऽक्षणगुणः स्मृतः ।
दीपनः कटुकः ग्राही रक्तपित्तहरः परम् ।।
रूक्षो नेत्रहितो व्रण्यः तृट्छर्दिकफपित्तहृत् ।
आमातिसारग्रहणीगुल्मार्शांसि च नाशयेत् ।। स्व.।।
(इंडियन् मेडिसिनल् प्लॉंट्स, कोट्टकल)

# मुद्गपर्णी (सं. व.)

जीवक....मुद्गपर्णी .... इति दशेमानि
शुक्रजननानि भवन्ति ॥19॥

(च. सू. 4)

मधुरस्कन्धे पठ्यते ॥146॥

(च. वि. 8)

काकोली .... मुद्गपर्णी .... मधुकं चेति ॥35॥
काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ॥36॥

(सु. सू. 38)

मुद्गपर्णी हिमा स्वादुः वातरक्तविनाशिनी।
पित्तदाहज्वरान् हन्ति कृमिघ्नी कफशुक्रनुत्॥139॥

(ध. नि. गुडूच्यादिवर्ग)

मुद्गपर्णी हिमा कासवातरक्तक्षयापहा।
पित्तदाहज्वरान् हन्ति चक्षुष्या शुक्रवृद्धिकृत्॥176॥

(रा. नि. गुडूच्यादिवर्ग)

मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुश्च शुक्रला ॥53॥
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी ग्रहण्यर्शोऽतिसारजित् ॥54॥

(भा. प्र. नि. गुडूच्यादिवर्ग)

## मुण्डितिका (श्रावणी) (सं. व.)

मुण्डिका कटुतिक्ता स्यादनिलास्त्रविनाशिनी।
आमारुचिघ्न्यपस्मारगण्डश्लीपदनाशिनी ।।161।।

(ध. नि. गुडूच्यादिवर्ग)

श्रावणी मधुरा तिक्ता कटुपाका कटुर्लघुः ।।989।।
वीर्योष्णा तुवरा मेध्या स्थिरा वातकफापहा ।
जयेत् गण्डापचीप्लीहमेदोऽपस्मारपाण्डुताः ।।990।।
श्लीपदारुचियोन्यर्तिकासकृच्छ्रगुदकृमीन् ।

(कै. नि. ओषधिवर्ग)

श्रावणी तु कषाया स्यात् कटूष्णा कफपित्तनुत्।
आमातीसारकासघ्नी विषच्छर्दिविनाशिनी ।।218।।
महामुण्डोष्णतिक्ता च ईषद् गौल्या मरुच्छिदा।
स्वरकृद्रोचनी चैव मेहकृच्च रसायनी ।।222।।

(रा. नि. गुडूच्यादिवर्ग)

मुण्डितिका कटुः पाके वीर्योष्णा मधुरा लघुः।
मेध्या गण्डापचीकृच्छ्रकृमियोन्यर्त्तिपाण्डुनुत्।।217।।
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्तिहृत्।

(भा. प्र. नि. गुडूच्यादिवर्ग)

# न्यग्रोधः (वटांकुरः)

विशेषतो विट्पथसंप्रवृत्ते पयो मतं मोचरसेन सिद्धम्।
वटावरोहैर्वटशुङ्गकैर्वा ह्रीवेरनीलोत्पलनागरैर्वा।।86।।
(च. चि. 4)

वटः शीतः कषायश्च स्तम्भनो रूक्षणात्मकः ।
तथा तृष्णाछर्दिमूर्च्छारक्तपित्तविनाशनः ।।70।।
(ध. नि. आम्रादिवर्ग)

वटो रूक्षो हिमो ग्राही कषायो योनिदोषहृत्।
वर्ण्यो व्रणविसर्पघ्नः कफपित्तहरो गुरुः।।423।।
(कै. नि. ओषधिवर्ग)

वटः कषायो मधुरः शिशिरः कफपित्तजित्।
ज्वरदाहतृषामोहव्रणशोफापहारकः ।।118।।
(रा. नि. आम्रादिवर्ग)

वटःशीतो गुरुर्ग्राही कफपित्तव्रणापहः।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत्।।2।।
(भा. प्र. वटादिवर्ग)

# निम्बूकः (जम्बीरःदन्तशठं) (फलम्)

आम्रातकं दन्तशठमम्लं सकरमर्दकम् ॥58॥
रक्तपित्तकरं विद्यादैरावतकमेव च।
(च. सू. 27)

आम्रातक .... दन्तशठैरावतक .... फलानि
.... इति अम्लस्कन्धः ॥147॥
(च. वि. 8)

सुश्रुते दन्तशठं अम्लवर्गे पठितः ॥11॥
(सु. सू. 42)

तृष्णाशूलकफोत्क्लेशच्छर्दिश्वासनिवारणम्।
वातश्लेष्मविबन्धघ्नं जम्बीरं गुरु पित्तकृत्॥
ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ॥162; 191॥
(सु. सू. 46)

तृष्णाशूल .... गुरुपित्तलम् ॥15॥
सुश्रुतोक्तपाठः अन्यच्च-जम्बीरं गुरु नात्यम्लं-
वातश्लेष्मविबन्धहृत् ॥16॥
कटुकमधुरमम्लं सुप्रतीतं रसे स्याद्रुचिकरमुदराग्नेस्तर्पणं-
चातिसारि।
हरति कफसमीरौ पित्तमाहन्ति वीर्यकरणमपि-
न हृद्यं रक्तपित्त तनोति ॥17॥
(ध. नि. आम्रादिवर्ग )

जम्बीरं तृट्कफोत्क्लेदशूलश्वासविबंधनुत् ।
गुरुश्लेष्मानिलच्छर्दिनाशनं पित्तकोपनम् ।।463।।
(शो. नि. आम्रादिवर्ग )

जम्बीरमुष्णगुर्वम्लं वातश्लेष्मविबंधनुत् ।।316।।
शूलकासकफोत्क्लेशच्छर्दितृष्णामदोषजित्।
आस्यवैरस्यहृत्पीडाजन्तुघ्नं पित्तकोपनम् ।।317।।
(कै. नि. ओषधिवर्ग)

जम्बीरस्य फलं रसेऽम्लमधुरं वातापहं पित्तकृत्पथ्यं
पाचनरोचनं बलकरं वह्नेर्विवृद्धिप्रदम्।
पक्वं चेन्मधुरं कफार्तिशमनं पित्तास्त्रदोषापनुद्वर्ण्यं
वीर्यविवर्धनं च रुचिकृत्पुष्टिप्रदं तर्पणम् ।।19।।
(रा. नि. आम्रादिवर्ग )

जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् ।।
शूलकासकफोत्क्लेशच्छर्दितृष्णाऽमदोषजित् ।।
आस्यवैरस्यहृत्पीडावह्निमान्द्यक्रिमीन् हरेत् ।।
स्वल्पजम्बीरिका तद्वत्तृष्णाच्छर्दिनिवारिणी ।।135।।
(भा. प्र. नि. आम्रादिवर्ग )

निर्गुण्डी तुवरा तिक्ता मेध्या शीतोषणा लघुः ॥127॥
चक्षुष्या दीपनी केश्या कफानिलविषापहा।
हन्त्यरोचकशूलामगुल्ममेदोव्रणकृमीन् ॥128॥
शोफकुष्ठप्रतिश्यायश्वासकासांश्च सा द्विधा ॥129॥
(कै. नि. ओषधिवर्ग)

कटूष्णा नीलनिर्गुण्डी तिक्ता रूक्षा च कासजित् ।
श्लेष्मशोफसमीरार्त्तिप्रदराध्मानहारिणी ॥154॥
(रा. नि. शताह्वादिवर्ग)

सिन्दुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ।
केश्यो नेत्रहितो हन्ति शूलशोथाममारुतान् ।
कृमिकुष्ठारुचिश्लेष्मज्वरान्नीलापि तद्विधा ॥114॥
(भा. प्र. नि. गुडूच्यादिवर्ग)

निर्गुण्डी कटुका तिक्ता रूक्षोष्णा च कषायका ।
स्मृतिप्रदा नेत्रहिता केश्या लघ्वग्निदीपनी ॥
मेध्या वर्ण्या च संप्रोक्ता गुदवातक्षयापहा ।
सन्धिवातं च वातं च शोफं त्वामं कृमींस्तथा ॥
कुष्ठं कफं व्रणं प्लीहां गुल्मं कण्ठरुजं तथा।
विषशूलं चारुचीं च ज्वरमेदोरुजं तथा ।
गृध्रसी च प्रतिश्यायं कासं श्वासं च नाशयेत् ॥
(नि. र.)

## पलाशः (पुष्प)

किंशुकं (पुष्पं) कफपित्तघ्नम् ॥288॥
(सु. सू. 46)

किंशुकस्यापि कुसुमं सुगन्धि मधुरं च यत् ॥150॥
(ध. नि. आम्रादिवर्ग)

.... तत् पुष्पं स्वादुतिक्तकम्।
कषायं कटुकं पाके वातलं ग्राहि शीतलम्
तृड्दाहकफपित्तास्रकुठहृत् .... ॥834॥
(कै. नि. ओषधिवर्ग)

तस्येपुष्पञ्च सोष्णंच कण्डूकुष्ठार्तिनाशनम् ॥38॥
रक्तः पीतः सितो नीलः कुसुमैस्तु विभज्यते ।
किंशुकैर्गुणसाम्येऽपि सितो विज्ञानदः स्मृतः ॥39॥
(रा. नि. करवीरादिवर्ग)

तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम् ॥51॥
वातलं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलम् ।
तृड्दाहशमकं वातरक्तकुष्ठहरं परम् ॥52॥
(भा. प्र. नि. वटादिवर्ग)

## पलाशः (निर्यास)

पित्ताभिष्यन्दे ......
पालाशं स्याच्छोणितं चाञ्जनार्थे ॥7॥

(सु. उ. 10)

पलाशमूलस्वरसो नेत्रच्छायान्ध्यपुष्पजित्॥535॥
तद्रक्तमपि तद्वच्च पुष्पं बकुलपुष्पवत् ।

(शो. नि. आम्रादिवर्ग)

दिनावसाने रुधिरं पलाशादादाय नेत्रे सहसैव दद्यात्।
नक्तान्ध्यमाश्वेव विजित्य जीवेच्चन्द्रातपे चाक्षरवाचकः स्यात्॥

(वैद्यमनोरमा)

पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित्।
भग्नसंधानकृद् दोषग्रहण्यर्शः कृमीन् हरेत् ॥
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥50॥

(भा. प्र. नि. वटादिवर्ग)

## पलाशः (बीजम्)

....पलाशतैलानि मधुरकषायाणि कफपित्तप्रशमनानि ॥121॥
(सु. सू. 45)

बीजं तु कटुकं स्निग्धमुष्णं कृमिबलासजित् 150॥
(ध. नि. आम्रादिवर्ग)

तद्बीजं कृमिविध्वंसि ......... ॥536॥
(सो. नि. ॥)

तृड्दाहकफपित्तास्त्रकुष्ठहृत् फलमस्य च ॥834॥
कषायं कटुकं पाके वातलं ग्राहि शीतलम्।
रूक्षं विपाके कटुकं लघूष्णं कफवातजित् ॥835॥
कुष्ठगुल्मोदरप्लीहमेहार्शः कृमिशूलनुत्।
(कै. नि. ओषधिवर्ग)

पलाशस्तु कषायोष्णः कृमिदोषविनाशनः ।
तद्बीजं पामकण्डूतिदद्रुत्वग्दोषनाशकृत् ॥37॥
(रा. नि. करवीरादिवर्ग)

पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥50॥
भग्नसंधानकृद् दोषग्रहण्यर्शः कृमीन् हरेत् ॥
फलं लघूष्णं मेहार्शः कृमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठं गुल्मोदरप्रणुत् ॥53॥
(भा. प्र. नि. वटादिवर्ग)

फलबीजं च स्निग्धोष्णं कटुकृमिकफान् जयेत् ।
(नि. र.)

# पर्पटकः (सं.व.)

**नागर..पर्पटक..इति दशेमानि तृष्णानिग्रहणानि भवन्ति ।।29।।**

(च. सू. 4)

**.... शाकं पार्पटकं च यत् ।**
**कफपित्तहरं तिक्तं शीतं कटु विपच्यते ।।95।।**

(च. सू. 27)

आटरूषक .... पर्पटाः ।
किराततिक्तसहितास्तिक्ता पित्तकफापहाः ।।270।।

(सु. सू. 4)

पर्पटः शीतलस्तिक्तः पित्तश्लेष्मज्वरापहः ।
रक्तदाहारुचिग्लानिमदभ्रमविनाशनः ।।45।।

(ध. नि. गुडूच्यादिवर्ग)
(रा. नि. पर्पटादि वर्ग 10)

पर्पटः कटुकः पाके रसे तिक्तो हिमो लघुः ।।1108।।
संग्राही वातलो हन्ति दाहपित्तकफज्वरान्।
पिपासारोचकच्छर्दिरक्तपित्तमदभ्रमान् ।। 1109।।

(कै. नि. ओषधिवर्ग.)

पर्पटो हन्ति पित्तास्त्रभ्रमतृष्णाकफज्वरान् ।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघु ।।90।।

(भा. प्र. नि. गुडूच्यादिवर्ग)

# पाटला (काण्डत्वक्)

पाटला..गोक्षुरका इति दशेमानि श्वयथुहराणि भवन्ति ।।38।।
(च. सू.4)

मृदुक्षारनिर्माणे .. पाटला .. समूलफलपत्रशाखा दहेत् ।।11।।
(सु. सू.11)

अपामार्गः सर्जरसः पाटलालकुचत्वचौ ।
उत्पाटके प्रलेपः स्यात्तैलमेभिश्चपाचयेत् ।।27(8)।।
(सु. सू.16)

मेहकुष्ठज्वरवमी कण्डूघ्नो व्रणशोधनः ।।6-7।।
(सु. सू.38)

बिल्व .... पाटलाः काश्मरी चेति महत् (पञ्चमूलम्)
सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्।
मधुरानुरसं चैव पञ्चमूलं महत् स्मृतम् ।।68-69।।
(सु. सू.38)

त्रिवृता .... रम्यकपाटलापूग .... चेत्यधोभागहराणि ।
तत्र .... पाटलान्तानां त्वचः ।।4।।
(सु. सू.39)

पाटलाकरवीराणां क्षारमेवं समाचरेत् ।।23।।
(सु. चि.7)

मूत्राघातेऽश्मर्याञ्च-पाटलाक्षारमाहृत्य सप्तकृत्वः परिस्रुतम्।
पिबेन्मूत्रविकारघ्नं संसृष्टं तैलमात्रया ।।46।।

(सु. उ.58)

सिध्दं कल्ककषायाभ्यां पाटल्याः कटुतैलकम्।
दग्धव्रणरुजास्रावदोहविस्फोटनाशनम् ।।22।।

(वृ. मा. 45)

पाटला तु रसे तिक्ता गुरूष्णा पवनास्रजित् ।
पित्तहिक्कावमीशोफकफारोचकनाशिनी ।।117।।

(ध. नि. गुडूच्यादिवर्ग)

पाटला कफपित्तास्रछर्दितृट्मारुतापहा ।।156।।

(सोढल नि. ।।)

पाटलाऽरुचिशोफार्शःश्वासतृट्छर्दिनाशिनी।

(म.पा.नि.)

पाटला तुवराऽनुष्णा तिक्ता दोषत्रयापहा ।
अरुचिश्वासशोफास्रछर्दिहिध्मातृषापहा ।।37।।

(कै. नि. औषधिवर्ग)

पाटली तु रसे तिक्ता कटूष्णा कफवातजित् ।
शोफाध्मानवमिश्वासशमनी सन्निपातनुत् ।।50।।

(रा. नि. करवीरादिवर्ग)

पाटला तुवरा तिक्तानुष्णा दोषत्रयापहा ।
अरुचिश्वासशोफास्रछर्दिहिक्कातृषाहरी ।।21।।

(भा. प्र. नि. गुडूच्यादिवर्ग)